आघ्राणं धूपशेषादेर्निर्माल्यस्य च धारणम् ॥
नृत्यं भगवदग्रे च तथा वीणादिवादनम् ।
कृष्णलीलाद्यभिनयः श्रीभागवतसेवनम् ॥
पद्माचमालादिधृतिरेकादश्यादिजागरः ।
प्रासादरचनाद्यन्यज्ज्ञेयं शास्त्रानुसारतः ॥
लिखिता भगवद्धर्म्मा भक्तानां लक्षणानि च ।
तानि ज्ञेयानि सर्व्वाणि भक्तेर्वै लक्षणानि च ॥
तेषु ज्ञेयानि गौणानि मुख्यानि च विवेकिभिः ।
बहिरङ्गान्तरङ्गाणि प्रेमसिद्धौ च तानि
यत् ॥
भेदास्तु विविधा भक्तेर्भक्तभावादिभेदतः ।
मुक्ताफलादिग्रन्थेभ्यो ज्ञेयास्तल्लिखनैरलम् ॥
प्रेमभक्तौ च सिद्धायां सर्व्वेऽर्थाः सेवकाः स्वयम् ॥
भगवांश्चातिवश्यः स्यात्लिख्यतेऽस्याः सुल-
क्षणम् ॥"
अथ प्रेमभक्तिलक्षणम् । नारदपञ्चरात्रे ।
"अनन्यममता विष्णौ ममता प्रेमसङ्गता ।
भक्तिरित्युच्यते भीष्म ! प्रह्लादोद्धवनारदैः ॥
प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यतः परम् ।
सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम् ॥
चिह्नानि प्रेमसम्पत्तेर्बाह्यान्याभ्यन्तराणि च ।
कियन्त्युल्लिखितान्यस्या महिमैव विलिख्यते ॥"
अथ प्रेमसम्पत्तिचिह्नानि सप्तमस्कन्धे श्रीप्रह्ला-
दस्य बालानुशासने ।
"निशम्य कर्म्माणि गुणानतुल्यान्
वीर्य्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति नृत्यते च ॥
यदा ग्रहग्रस्त इव क्वचिद्धसत्या-
क्रन्दति ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे ! जगत्पते !
नारायणेत्यात्ममतिर्गतत्रपः ॥
तदा पुमान् मुक्तसमस्तबन्धन-
स्तद्भावभावानुकृताशयाकृतिः ।
निर्दग्धबीजानुशयो महीयसा
भक्तिप्रयोगेण समेत्यधोक्षजम् ॥"
एकादशे च श्रीकवियोगेश्वरोत्तरे ।
शृण्वन् सुभद्राणि रथाङ्गपाणे-
र्जन्मानि कर्म्माणि च यानि लोके ।
गीतानि नामानि तदर्थकानि
गायन् विलज्जो विचरेदसङ्गः ॥
एवंव्रतः स्वप्रियनामकीर्त्त्या
जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गाय-
त्युन्मादवन्नृत्यति लोकबाह्यः ॥"
तत्रैव श्रीप्रबुद्धयोगेश्वरोत्तरे ।
"स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।
भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥
क्वचिद्रुदन्त्यच्युतचिन्तया क्वचि-
द्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं
भवन्ति तूष्णीं परमेत्य निर्वृताः ॥

श्रीभगवदुद्धवसंवादे च ।
"कथं विना रोमहर्षं द्रवता चेतसा विना ।
विनानन्दाश्रुकलया शुद्ध्येद्भक्त्या विनाशयः ॥
वाग्गद्गदा द्रवते यस्य चित्तं
रोदित्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ॥
यथोक्तभक्त्यशक्तौ तु भगवच्चरणाम्बुजम् ।
शरणागतभावेन कृतत्वभीतिन्नमाश्रयेत् ॥"
इति हरिभक्तिविलासे ११ विलासः ॥
अपि च । उत्तमभक्तेर्लक्षणं यथा,—
"अन्याभिलाषिताशून्यं ज्ञानकर्म्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥
तथा नारदपञ्चरात्रे ।
"सर्व्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्म्मलम् ।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ॥"
श्रीभागवतस्य तृतीयस्कन्धे च ।
"अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ।
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ।
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ॥"
इति ॥
सा उत्तमा भक्तिः षड्विधा यथा,—
"क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा ।
सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षिणी च सा ॥"
तत्रास्याः क्लेशघ्नत्वम् ।
"क्लेशास्तु पापं तद्बीजमविद्या चेति ते त्रिधा ॥"
शुभदत्वं यथा,—
"शुभानि प्रीणनं सर्व्वजगतामनुरक्तता ।
सद्गुणाः सुखमित्यादीन्याख्यातानि मनी-
षिभिः ॥"
मोक्षलघुताकृद्यथा,—
"मनागेव प्ररूढ़ायां हृदये भगवद्रतौ ।
पुरुषार्थास्तु चत्वारस्तृणायन्ते समन्ततः ॥"
सुदुर्लभा यथा,—
"साधनौघैरनासङ्गैरलभ्या सुचिरादपि ।
हरिणा चाश्वदेयेति द्विधा सा स्यात् सुदुर्लभा ॥"
सान्द्रानन्दविशेषात्मा यथा,—
"ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः ।
नैति भक्तिसुखाम्भोधेः परमाणुतुलामपि ॥"
श्रीकृष्णाकर्षिणी यथा ।
"कृत्वा हरिम्प्रेमभाजम्प्रियवर्गसमन्वितम् ।
भक्तिर्वशीकरोतीति श्रीकृष्णाकर्षिणी च सा ॥"
सा उत्तमा भक्तिस्त्रिधा यथा,—
"सा भक्तिः साधनं भावः प्रेमा चेति त्रिधो-
दिता ॥"
साधनभक्तिर्यथा,—
"कृतिसाध्या भवेत् साध्यभावा सा साधनाभिधा ।
नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता ॥"
भावभक्तिर्यथा,—
"शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक् ।
रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते ॥"

प्रेमभक्तिर्यथा,—
"सम्यङ्मसृणितस्वान्तो ममत्वातिशयाङ्कितः ।
भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्यते ॥"
इति भक्तिरसामृतसिन्धौ पूर्व्वविभागः ॥
भक्तिमान् [त्] त्रि, ( भक्तिरस्यास्तीति । भक्ति +
"तदस्यास्त्यस्मिन्निति मतुप् ।" ५ । २ । ९४ ।
इति मतुप् । ) भक्तियुक्तः । यथा,—
"गुणवान् पुत्रवान् श्रीमान् कीर्त्तिमान् भक्ति-
मान् भवेत् ।
ऐहिके परमैश्वर्य्यमन्ते नाथपदं व्रजेत् ॥"
इति शाम्भवीतन्त्रान्तर्गतमहाकालभैरवस्तोत्रम् ॥
अपि च ।
"अन्येऽपि ये विकर्म्मस्थाः शूद्राद्या नीचजातयः ।
भक्तिमन्तः प्रमुच्यन्ते कालेन मयि सम्मताः ॥"
इति कौर्म्मे ४ अध्यायः ॥
भक्तियोगः, पुं, ( भक्तेर्योगः भक्त्या यो योग इति
वा । ) परमेश्वरे भजनसम्बन्धः । यथा,—
"भक्तियोगप्रकाशाय लोकस्यानुग्रहाय च ।
सन्न्यासाश्रममाश्रित्य कृष्णचैतन्यनामधृक् ॥"
इति चैतन्यभागवतम् ॥
अपि च ।
"वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानञ्च यदहैतुकम् ॥"
इति श्रीभागवते १ स्कन्धे १ अध्यायः ॥
( भक्तियोग उच्यते । यथा, गीतायाम् । १२ ।
१-२ । १४-२० ।
"एवं सततयुक्ता ये भक्तास्त्वां पर्य्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥
श्रीभगवानुवाच ।
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥२॥
सन्तुष्टः सततं योगी यतात्मा दृढ़निश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः ॥१४॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१५॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्व्वारम्भपरित्यागी यो मे भक्तः स मे
प्रियः ॥ १६ ॥
यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे
प्रियः ॥ १७ ॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्ज्जितः ॥१८॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो
नरः ॥ १९ ॥
ये तु धर्म्मामृतमिदं यथोक्तं पर्य्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे
प्रियाः ॥" २० ॥
भक्तिरसः, पुं, भक्तिरेव रसः । यथा,-
"विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः ।